কোকঃ সারসশারিকা শুক ইমে
ভক্ষ্যা ন শস্তাস্তথা ॥
গৃহচটকচকোরাঃ কাকজাত্যাশ্চ শ্যেনাঃ
পিকশুকবিষদষ্টক্রৌঞ্চদাত্যূহকঙ্কাঃ ।
জলকরটকপোতা পোতকী খঞ্জরীটাঃ
কলবিকমশকাদ্যা যূকমিক্ষাদয়োঽন্যে ॥
এতে ভক্ষ্যা নৈব ভক্ষ্যা ন চেষ্টা
যে চাপ্যন্যেঽজ্ঞাতনামাণ্ডজাশ্চ ।
অন্যে চাপি শ্বাপদা যে চ নিন্দ্যা-
স্তে চাখাদ্যা বর্জ্জিতাশ্চাত্র সর্ব্বে” ॥
ইতি হারীতে প্রথমস্থানে । ১১ অঃ ।
“কাককঙ্ককুররচাষভাসশশঘাত্যুলূকচিল্লিশ্যেনগৃধ্রপ্রভৃতয়ঃ প্রসহাঃ ॥
“এতে সিংহাদিভিঃ সর্ব্বে সমানা বায়সাদয়ঃ ।
রসবীর্য্যে বিপাকেষু বিশেষাচ্ছোষিণে হিতাঃ” ॥
ইতি সুশ্রুতে সূত্রস্থানে । ৪৬ অঃ ॥) পীঠসর্পী । খোঁড়া ইতি ভাষা ॥ দ্বীপবিশেষঃ । পরিমাণভেদঃ । বৃক্ষবিশেষঃ । শিরোঽবক্ষালনম্ । ইতি হেমচন্দ্রমেদিনীকরৌ ॥ তিলকঃ । অতিধৃষ্টঃ । ইতি শব্দরত্নাবলী ॥

কাককঙ্গুঃ, স্ত্রী, (কাকপ্রিয়ঃ কঙ্গুঃ ।) চীনকঃ । ইতি হেমচন্দ্রঃ ॥

কাককলা, স্ত্রী, (কাকস্য কলা অঙ্গং জঙ্ঘাবয়বঃ তদ্বৎ অঙ্গং যস্যাঃ ।) কাকজঙ্ঘাবৃক্ষঃ । ইতি জটাধরঃ ॥

কাকঘ্নী, স্ত্রী, (কাকং হন্তীতি । কাক+হন্+টঃ টিত্বাৎ ঙীপ্ ।) মহাকরঞ্জঃ । ইতি রাজনির্ঘণ্টঃ ॥

কাকচিঞ্চা, স্ত্রী, (কাকবর্ণা চঞ্চা প্রান্তভাগঃ ফলে যস্যাঃ । পৃষোদরাদিত্বাৎ সাধুঃ ।) গুঞ্জা । ইতি শব্দরত্নাবলী । কুঁচ ইতি ভাষা । (গুঞ্জাশব্দেঽস্যা বিবরণং বোদ্ধব্যম্ ॥)

কাকচিঞ্চিঃ, স্ত্রী, (কাকবর্ণা চঞ্চা প্রান্তভাগঃ ফলে যস্যাঃ । পৃষোদরাদিত্বাৎ সাধুঃ ।) গুঞ্জা । ইতি শব্দরত্নাবলী ॥

কাকচিঞ্চী, স্ত্রী, (কাকচিঞ্চি+বা ঙীপ্ ।) গুঞ্জা । ইত্যমরঃ । ২ । ৪ । ৯৮ ॥ (অস্যাঃ পর্য্যায়ো ভাবপ্রকাশস্য পূর্ব্বখণ্ডে প্রথমে ভাগে । যথা,—
“শ্বেতা রক্তোচ্চটা প্রোক্তা কৃষ্ণলা চাপি সা স্মৃতা ।
রক্তা সা কাকচিঞ্চী স্যাৎ কাকাদন্তী চ রক্তিকা ।
কাকাদনী কাকপীলুঃ সা স্মৃতা কাকবল্লরী” ।
গুঞ্জাশব্দে বিবরণান্তরং জ্ঞেয়ম্ ॥)

কাকচ্ছদঃ, পুং, (কাকস্য ছদঃ পক্ষ ইব ছদো যস্য ।) খঞ্জনপক্ষী । ইতি শব্দরত্নাবলী ॥

কাকচ্ছদিঃ, পুং, খঞ্জনপক্ষী । ইতি ত্রিকাণ্ডশেষঃ ॥ (খঞ্জরীটশব্দেঽস্য বিবৃতির্জ্ঞেয়া ॥)

কাকজঙ্ঘা, স্ত্রী, (কাকস্য জঙ্ঘেবাকৃতির্যস্যাঃ ।) স্বনামখ্যাতবৃক্ষবিশেষঃ । কেঁউয়া ঠেঙ্গা ইতি ভাষা । তৎপর্য্যায়ঃ । কাকাঙ্গী২ কাকাহ্বী ৩ কাকনাসিকা ৪ । ইতি শব্দরত্নাবলী॥ কৃষীবলঃ । ইতি রত্নমালা ॥ ধ্বাঙ্ক্ষজঙ্ঘা ৬ কাকাঙ্গা ৭ সুলোমশা ৮ পারাবতপদী ৯ দাসী ১০ নদীকান্তা ১১ । অস্যা গুণাঃ । তিক্তত্বম্ । উষ্ণত্বম্ । কৃমিব্রণকফবাধির্য্যজীর্ণজীর্ণবিষমজ্বরনাশিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥
(“কাকজঙ্ঘা বলা শ্যামা ব্রহ্মদণ্ডী কৃতাঞ্জলিঃ ।
পৃশ্নিপর্ণী ত্বপামার্গস্তথা ভৃঙ্গরজোঽষ্টমঃ ॥
এষামন্যতমং মূলং পুষ্যেণোদ্ধৃত্য যত্নতঃ ।
রক্তসূত্রেণ সংবেষ্ট্য বদ্ধমৈকাহিকং জয়েৎ” ॥
ইতি বৈদ্যকচক্রপাণিসংগ্রহে জ্বরাধিকারে ॥
মসীতি লোকে । অস্যাঃ পর্য্যায়া গুণাশ্চ যথা,—
“কাকজঙ্ঘা নদীকান্তা কাকতিক্তা সুলোমশা ।
পারাবতপদী দাসী কাকা চাপি প্রকীর্ত্তিতা ॥
কাকজঙ্ঘা হিমা তিক্তা কষায়া কফপিত্তজিৎ ।
নিহন্তি জ্বরপিত্তাস্রজ্বরকণ্ডূবিষক্রিমীন্” ॥
ইতি ভাবপ্রকাশস্য পূর্ব্বখণ্ডে প্রথমে ভাগে ॥)
গুঞ্জা । ইতি রত্নমালা ॥

কাকজম্বুঃ, স্ত্রী, (কাকবর্ণা জম্বুঃ ।) ভূমিজম্বুঃ । ক্ষুদ্রজম্বুঃ । ইতি শব্দমালা । বনজাম্ ইতি ভাষা ॥

কাকজম্বূঃ, স্ত্রী, (কং জলং অকতি আশ্রয়ত্বেন গচ্ছতীতি । ক+অক্+অণ্+টাপ্ চ । কাকা জম্বূঃ । যদ্বা কাকবর্ণা জম্বূঃ ।) জম্বূপ্রভেদঃ । তৎপর্য্যায়ঃ । কাকফলা ২ নাদেয়ী ৩ কাকবল্লভা ৪ ভৃঙ্গেষ্টা ৫ কাকনীলা ৬ ধ্বাঙ্ক্ষজম্বূঃ ৭ ধনপ্রিয়া ৮ । অস্যা গুণাঃ । কষায়ত্বম্ । অম্লত্বম্ । পাকে মধুরত্বম্ । গুরুত্বম্ । দাহশ্রমাতিসারনাশিত্বম্ । বীর্য্যবৃদ্ধিবলপ্রদত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

কাকণং, ক্লী, (কু ঈষৎ কণতি নিমীলতি ইতি । অচ্ কাকণং গুঞ্জাফলং তদ্বদাকৃতিরস্যাস্তীতি কৃষ্ণারক্তচিহ্নিতত্বাদস্য তথাত্বম্ ।) কুষ্ঠবিশেষঃ । তস্য লক্ষণম্ । যথা,—
“যৎ কাকণন্তিকাবর্ণমপাকং তীব্রবেদনম্ ।
ত্রিদোষলিঙ্গং তৎকুষ্ঠং কাকণং নৈব সিধ্যতি” ॥
ইতি মাধবকরঃ ॥ (“কাকণং তীব্রদাহরুক্ ॥
“পূর্ব্বং রক্তঞ্চ কৃষ্ণঞ্চ কাকণন্তীফলোপমম্ ।
কুষ্ঠলিঙ্গৈর্যুতং সর্ব্বৈর্নৈকবর্ণং ততো ভবেৎ ॥
দোষভেদীয়বিহিতৈরাদিশেল্লিঙ্গকর্ম্মভিঃ” ॥
ইতি বাভটে নিদানস্থানে ১৪ অঃ ॥
“কাকণন্তিকা বর্ণান্যাদৌ যস্মাৎ সর্ব্বকুষ্ঠলিঙ্গসমন্বিতানি পাপীয়সং সর্ব্বকুষ্ঠলিঙ্গসম্ভবে নানেকবর্ণানি কাকণানীতি বিদ্যাৎ ।
ইতি নিদানস্থানে ৫ অঃ । চরকেণোক্তম্ ॥)

কাকণন্তিকা, স্ত্রী, (কু ঈষৎ কণন্তী নিমীলন্তী । কন্ নিমীলনে শতৃ ঙীপ্ কোঃকাদেশঃ । ততঃ কন্ টাপ্ চ পৃষোদরাদিত্বাৎ সাধুঃ ।) গুঞ্জা । ইতি রত্নমালা । কুঁচ ইতি ভাষা ॥
(“যৎকাকণন্তিকাবর্ণমপাকং তীব্রবেদনম্” ।
ইতি চরকে চিকিৎসাস্থানে ৭ অঃ ॥)

কাকতিক্তা, স্ত্রী, (কাকমাংসবৎ তিক্তা ইতি মধ্যপদলোপি সমাসঃ ।) কাকচিঞ্চা । ইতি রত্নমালা । কুঁচ ইতি ভাষা । (অস্যাঃ পর্য্যায়ো যথা,—
“কাকজঙ্ঘা নদীকান্তা কাকতিক্তা সুলোমশা ।
পারাবতপদী দাসী কাকা চাপি প্রকীর্ত্তিতা” ॥
ইতি ভাবপ্রকাশস্য পূর্ব্বখণ্ডে প্রথমে ভাগে ॥)

কাকতিন্দুকঃ, পুং, (কং জলং অকতি ইত্যণ্ । কাকঃ তিন্দুকঃ কাকবর্ণো বা তিন্দুকঃ কাকপ্রিয়স্তিন্দুকো বা ।) বৃক্ষবিশেষঃ । মাকড়া কেন্দ । মাকড়ো গাব্ । কাকতেঁদু ইতি চ ভাষা । তৎপর্য্যায়ঃ । কাকেন্দুঃ ২ কুলকঃ ৩ কাকপীলুকঃ ৪ । ইত্যমরঃ । ২ । ৪ । ৩৬ ॥ কাকপীলুঃ ৫ কাকাণ্ডঃ ৬ কাকস্ফূর্জ্জঃ ৭ কাকাণ্ডঃ ৮ কাকবীজকঃ ৯ । অস্য গুণাঃ । কষায়ত্বম্ । অম্লত্বম্ । গুরুত্বম্ । বাতবিকারনাশিত্বঞ্চ । পক্বস্য তস্য গুণাঃ । মধুরত্বম্ । কিঞ্চিৎকফকারিত্বম্ । বান্তিপিত্তনাশিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥ (কাকাণ্ডশব্দেঽস্য বিবরণং জ্ঞেয়ম্ ॥)

কাকতুণ্ডঃ, পুং, (কাকতুণ্ডস্যেব বর্ণোঽস্ত্যস্য । অর্শআদিত্বাৎ অচ্ ।) কালাগুরু । ইতি হেমচন্দ্রঃ ॥

কাকতুণ্ডিকা, স্ত্রী, (কাকতুণ্ডস্যেব বর্ণঃ ফলাংশেঽস্যাঃ ইতি ঠন্ । স্ত্রিয়াং টাপ্ চ ।) কাকচিঞ্চা । গুঞ্জা । ইতি হলায়ুধঃ ।

কাকতুণ্ডী, স্ত্রী, (কাকং ঈষদ্দুঃখং তুণ্ডতে নাশয়তীতি । তুড়ি ড বধে+অণ্ । গৌরাদিত্বাৎ ঙীষ্ ।) রাজরীতিঃ । রাজপিতল ইতি ভাষা । ইতি রাজনির্ঘণ্টঃ ॥ (কাকতুণ্ডস্যেবাকৃতির্বিদ্যতে ঽস্যাঃ । অর্শ আদিত্বাদচ্ । গৌরাদিত্বাৎ ঙীষ্ ।) বৃক্ষবিশেষঃ । কৌয়াঠোড়ী । ইতি হিন্দী ভাষা । তৎপর্য্যায়ঃ । কাকাদনী ২ কাকপীলুঃ ৩ কাকশিম্বী ৪ রক্তলা ৫ ধ্বাঙ্ক্ষাদনী ৬ বক্রশল্যা ৭ দুর্ম্মোহা ৮ বায়সাদনী ৯ ধ্বাঙ্ক্ষনখী ১০ বায়সী ১১ কাকদন্তিকা ১২ ধ্বাঙ্ক্ষদন্তী ১৩ । অস্য গুণাঃ । কটুত্বম্ । উষ্ণত্বম্ । তিক্তত্বম্ । দ্রবত্বম্ । রসায়নত্বম্ । বাতদোষহারিত্বম্ । রুচিকারিত্বম্ । পলিতস্তম্ভিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

কাকধ্বজঃ, পুং, (কাকমীষজ্জলং বাসং ধ্বজ ইবাস্য ।) বাড়বাগ্নিঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

কাকনামা, [ন্] পুং, (কাকস্য নাম নাম যস্য ।) বকবৃক্ষঃ । ইতি রত্নমালা ॥ (কাকশীর্ষশব্দেঽস্য বিবরণং বোধ্যম্ ।)

কাকনাসঃ, পুং, (কাকস্য নাসায়া বর্ণঃ ইব ফলে যস্য ।) বিকণ্টকবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

কাকনাসা, স্ত্রী, (কাকস্য নাসা ইব ফলমস্যাঃ ।) কাকজঙ্ঘাবৃক্ষঃ । ইতি জটাধরঃ । (অস্যাঃ পর্য্যায়া গুণাশ্চ যথা, ভাবপ্রকাশস্য পূর্ব্বখণ্ডে ১ ভাগে ।
“কাকনাসা তু কাকাঙ্গী কাকতুণ্ডফলা চ সা ।
কাকনাসা কষায়োষ্ণা কটুকা রস পাকয়োঃ ।
কফঘ্নী বামনী তিক্তা শোথার্শঃ শ্বিত্রকুষ্ঠহৃৎ” ॥

কাকনাসিকা, স্ত্রী, (কাকনাসা ততঃ স্বার্থে কন্ টাপ্ অত ইত্বম্ ।) কাকজঙ্ঘাবৃক্ষঃ । ইত্যমরঃ । ২ । ৪ । ১১৮ ॥ রক্তত্রিবৃৎ । ইতি রাজনির্ঘণ্টঃ ।

কাকপক্ষঃ, পুং, (কাকস্য পক্ষ ইব আকারোঽস্ত্যস্য । কাকপক্ষ+অচ্ ।) মস্তকপার্শ্বদ্বয়ে কেশরচনাবিশেষঃ । কাণপাটা জুল্পী ইতি চ ভাষা ।